**अध्यायः 8**

# त्यक्तयुद्धः अशोकः कश्चन विलक्षणः सम्राट्



### रौशनायाः रुप्यकाणि

जन्मदिनस्य अवसरे रौशनायै पितामहः नूतनानि धनपत्राणि(नोट) अददात् । सा तानि स्वहस्ते गोपयित्वा स्थापितवती आसीत् । सा नूतनां सान्द्रमुद्रिकां क्रेतुम् इच्छति स्म परन्तु सा सर्वथा नूतनानि धनपत्राणि अपि द्रष्टुम् अनुभवितुं च इच्छति स्म । तदा सा अपश्यत् यत् सर्वेषां धनपत्रणां दक्षिणतः गान्धिनः स्मितमुखं चित्रितम् आसीत् । वामतः लघु-लघुसिंहाः चित्रिताः आसन् । सा अचिन्तयत् 'अत्र सिंहाः किमर्थं चित्रिताः सन्ति' ।



सिंहयुक्तं स्तम्भ-शीर्षम्

### महत् राज्यम् - साम्राज्यम्

वयं येषां सिंहानां चित्राणि रुप्येकेषु पश्यामः, तेषां कश्चित् सुदीर्घः इतिहासः अस्ति । ते सिंहाः पाषाणान् कर्तयित्वा निर्मिताः सन्ति अपि च ते सारनाथे कस्मिंश्चित् विशालस्तम्भे स्थापिताः आसन् । (एतस्मिन् विषये भवती सप्तमे अध्याये अपठत् ।)

इतिहासे महत्तमेषु राजसु अशोकः अन्यतमः आसीत् । अशोकस्य निर्देशेन एतादृशाः अभिलेखाः अनेकेषु स्तम्भेषु पाषाणेषु च उत्कीर्णाः । किञ्चित् अन्यत् अवगमनात् पूर्वं यथा एतेषु अभिलेखेषु किं लिखितम् इत्यादि अवगमनात् पूर्वं सर्वादौ इदं ज्ञातुं प्रयतामहे यत् तस्य राज्यं साम्राज्यम् इति किमर्थम् उच्यते ।

अशोकः यस्मिन् साम्राज्ये शासनं करोति स्म । तस्य स्थापना तस्य पितामहः चन्द्रगुप्तमौर्यः प्रायः २३००वर्षेभ्यः पूर्वम् अकरोत् । चाणक्यः अथवा कौटिल्यनामकः कश्चित् बुद्धिमान् जनः चन्द्रगुप्तस्य साहाय्यं कृतवान् आसीत् । चाणक्यस्य अनेके विचाराः अर्थशास्त्रनामके पुस्तके उपलभ्यन्ते ।

**वंशः**

यदा एकस्य एव कुटुम्बुस्य अनेके सदस्याः उत्तरोत्तर-क्रमेण राजपदम् अलङ्कुर्वन्ति, तदा ते समवंशीयाः इति उच्यन्ते । मौर्यवंशे त्रयः महान्तः राजानः अभवन् । चन्द्रगुप्तः तस्य पुत्रः बिन्दुसारः बिन्दुसारस्य च पुत्रः अशोकः इति

साम्राज्ये बहूनि नगराणि आसन् । (मानचित्रे तानि कृष्णबिन्दुभिः चिह्नितानि सन्ति) एतेषु साम्राज्यस्य राजधानी पाटलीपुत्रम्,उज्जैनः तक्षशिलासदृशानि च नगराणि आसन् । तक्षशिला उत्तरपश्चिमं मध्यैशियां च गन्तुं मार्गः आसीत् । अपरस्मिन् पक्षे उज्जैनः उत्तरभारतात् दक्षिणभारतं प्रति गम्यमानस्य मध्यमार्गे आसीत् । प्रायः नगरेषु व्यापारिणः सर्वकारीयाः अधिकारिणः शिल्पकाराः च निवसन्ति स्म ।

साम्राज्यस्य बृहत्सु क्षेत्रेषु कृषकाणां पशुपालकानां च ग्रामाः आसन् । मध्यभारतसदृशेषु क्षेत्रेषु अधिकभागाः वनावृताः आसन् । जनाः तेभ्यः पुष्पाणां फलानां च सङ्ग्रहणं अपि च पशूनाम् आखेटं कृत्वा जीवनयापनं कुर्वन्ति स्म । साम्राज्यस्य पृथक्-पृथक्-क्षेत्रेषु जनाः पृथक्-पृथक् भाषाः वदन्ति स्म । ते जनाः प्रायः पृथक्-पृथक् भोजनं कुर्वन्ति स्म अपि च ते परिधानानि अपि पृथक्-पृथक् प्रकारकाणि धरन्ति स्म ।

येषु स्थलेषु अशोकस्य शिलालेखाः अलभ्यन्त तानि स्थलानि रक्तबिन्दुभिः चिह्नितानि सन्ति । एतानि सर्वाणि क्षेत्राणि साम्राज्यस्य आभ्यन्तरे आसन् । तेषां देशानां नामानि ज्ञापयतु यत्र अशोकस्य अभिलेखाः प्राप्ताः सन्ति । भारतस्य कानि कानि राज्यानि मौर्यसाम्राज्यात् बाह्यानि आसन्?



### राज्यं साम्राज्यतः कथं पृथक् भवति ?

- यतो हि साम्राज्यानि राज्येभ्यः व्यापकानि भवन्ति, अपि च तेषां रक्षायै महतीनां सेनानाम् आवश्यकता भवति। अतः नृपाणाम् अपेक्षया सम्राड्भ्यः अधिकसंसाधनानाम् आवश्यकता भवति।
- अतः तेभ्यः सम्राड्भ्यः व्यापकसङ्ख्यायां करस्य एकत्रीकरणाय अधिकारिणाम् आवश्यकता भवति।

### साम्राज्यस्य प्रशासनम्

यतो हि मौर्यसाम्राज्यं विशालतमम् आसीत् अतः पृथक्-पृथक् भागेषु पृथक्तया शासनं क्रियते स्म । पाटलिपुत्रस्य तस्य समीपवर्तिषु क्षेत्रेषु च साक्षात् सम्राजः नियन्त्रणम् आसीत्। एतस्य इदं तात्पर्यम् आसीत् यत् एतस्य क्षेत्रस्य ग्राम्यकृषकेभ्यः नागरकृषकेभ्यः पशुपालकेभ्यः शिल्पकारेभ्यः व्यापारिभ्यः च राजस्वम् एकत्रीकर्तुं सम्राट् अधिकारिणः नियोजयति स्म । ये सम्राजः आदेशानाम् उल्लङ्घनं कुर्वन्ति स्म, अधिकारिणः तान् दण्डयन्ति स्म । एतेषु नैकेषाम् अधिकारिणां कृते वेतनम् अपि दीयते स्म। संदेशवाहकाः एकस्मात् स्थानात् अनन्तरस्थाने भ्रमन्ति स्म, तथा च सम्राजः गुप्तचराः अधिकारिणां कार्यस्य निरीक्षणं कुर्वन्ति स्म। सम्राट् साम्राज्यस्य सर्वोच्चाधिकारी आसीत्, यः राज-परिवारस्य वरिष्ठमन्त्रिणां च साहाय्येन सर्वान् शास्ति स्म।

मौर्यसाम्राज्यस्य आभ्यन्तरे अनेकानि लघुक्षेत्राणि अथवा अनेके प्रान्ताः आसन् । एतेषु तक्षशिलातः अथवा उज्जैनसदृशाभ्यः प्रान्तीयराजधानीभ्यः अपि शासनं क्रियते स्म । अल्पतया पाटलिपुत्रतः अपि एतेषु क्षेत्रेषु नियन्त्रणं स्थाप्यते स्म । राजकुमाराः प्रायः तत्रत्याः राज्यपालरूपेण नियोज्यन्ते स्म। परन्तु इत्थम् उह्यते यत् एतादृशेषु स्थानेषु स्थानीयपरम्पराभिः नियमानुसारं एव शासनं भवति स्म, अथवा तेषाम् एव मान्यता आसीत्।

प्रादेशिककेन्द्राणां मध्ये विस्तृतक्षेत्राणि आसन्। एतेषु क्षेत्रेषु मौर्यशासकाः केवलं मार्गेषु नदीषु च एव नियन्त्रणस्थापनस्य प्रयासं कुर्वन्ति स्म यानि आवागमनस्य कृते महत्त्वपूर्णानि आसन् । ते इतः यानि संसाधनानि राजस्वरूपेण उपहाररूपेण वा प्राप्नुवन्ति स्म तानि एकत्रीक्रियन्ते स्म । उदाहरणार्थम् अर्थशास्त्रे लिखितम् अस्ति यत् उत्तर-पश्चिम-भागः कम्बलानां कृते दक्षिणभारतं च सुवर्णस्य बहुमूल्यपाषाणानां च कृते प्रसिद्धम् आसीत् । सम्भाव्यते यत् संसाधनानि उपहार(नजराना)रूपेण एकत्रीक्रियन्ते स्म।

### उपहारः (नजराना)

यत्र ‘राजकराः’ नियमितप्रकारेण एकत्रीक्रियन्ते स्म तत्र एव ‘नजराना’ इति अनियमितरूपेण यदा सम्भवः स्यात् तदा एकत्रीक्रियते स्म । एतादृशाः उपहाराः(नजराना) विविधपदार्थानां रूपेण प्रायः एतादृशेभ्यः जनेभ्यः स्वीक्रियन्ते स्म, ये स्वेच्छया एतानि यच्छन्ति स्म ।

**राजधान्यां सम्राजः**

मेगस्थनीजः चन्द्रगुप्तस्य राजसभायां पश्चिमैशियायाः यूनानिनृपस्य सेल्यूकस-निकेटर् इत्यस्य राजदूतः आसीत् । मेगस्थनीजः यत्किमपि अलिखत् तस्य विवरणम् अददात् ।

अत्र वयं तस्य विवरणस्य अंशं दद्मः । जनतायाः पुरतः सम्राजि आगते सति शोभायात्रायाः रूपेण उत्सवः आयोज्यते । सम्राट् सुवर्णमय्यां शिविकायाम् उपावेश्य नीयते । तस्य अङ्गरक्षकाः सुवर्ण-रजतालङ्कृत-हस्तिषु आरुढाः भवन्ति । केचन अङ्गरक्षकाः वृक्षान् गृहीत्वा चलन्ति । एतेषु वृक्षेषु प्रशिक्षितशुकानां कश्चित् समूहः तिष्ठति, यः सम्राजः शिरः परितः भ्रमति । सम्राट् सामान्यतः सशस्त्र-महिलाभिः आवृत्तः भवति । सः सम्राट् सदैव एतस्मात् बिभेति यत् कुत्रचित् कश्चित् तस्य हत्यां कर्तुं न प्रयतेत । सम्राजे भोजनस्य परिवेशनात् प्राक् तस्य सम्राजः केचन विशिष्टाः सेवकाः पूर्वं तत् भोजनम् आस्वाद्य परीक्षन्ते । सम्राट् निरन्तरं द्वे रात्र्यौ यावत् एकस्मिन् एव प्रकोष्ठे न स्वपिति स्म ।

**अपि च पाटलिपुत्रस्य(आधुनिक-पटना) विषये**

इदं किमपि विशालं सुन्दरं च नगरम् अस्ति । इदं केनचित् विशाल-दुर्गेण आवृत्तम् अस्ति यस्मिन् ५७०शिखराः अपि च ६४द्वाराणि सन्ति । तलद्वय-तलत्रय-युक्तानि च गृहाणि काष्ठमयानि अपक्वेष्टिकामयानि च सन्ति । नृपस्य प्रासादः अपि काष्ठमयः अस्ति, यः विलिखित-पाषाणैः अलङ्कृतः अस्ति । अयं सर्वतः उद्यानैः चटकनीडैः च आवृत्तः अस्ति ।

राज्ञः भोजनात् प्राक् तद्भोजनं राज्ञः विशिष्टसेवकाय आस्वादयितुं किमर्थं दीयते स्म ?

पाटलिपुत्रं मोहनजोदडोः कथं भिन्नम् आसीत् ? (सङ्केतः चतुर्थम् अध्यायं पश्यतु) ।

अपि च अन्ते वनप्रदेशाः समाविष्टाः आसन्, तत्रत्याः वास्तव्याः प्रायः स्वतन्त्राः आसन् । तेभ्यः अपेक्ष्यते स्म यत् ते मौर्यपदाधिकारिभ्यः हस्ति-काष्ठ-मधु-सिक्थसदृशानि वस्तूनि आनीय यच्छेयुः ।

### अशोकः – कश्चित् विचित्रः सम्राट्

अशोकः मौर्यवंशस्य प्रसिद्धः शासकः आसीत् । सः प्रथमः तादृशः शासकः आसीत् यः अभिलेखमाध्यमेन स्वसन्देशान् जनेषु प्रसारितवान् । अशोकस्य अधिकतमाः अभिलेखाः प्राकृतभाषायामं तथा च ब्राह्मीलिप्यां सन्ति ।

### कलिङ्गयुद्धं वर्णयन् अशोकस्य अभिलेखः

स्वस्य कस्मिंश्चित् अभिलेखे अशोकः इदं तथ्यम् अवदत् –

"राज्याभिषेकस्य अष्टानां वर्षाणां पश्चात् अहं कलिङ्गविजयं अकरवम् ।

प्रायः सार्धैकलक्षं जनाः कारागृहं प्रेषिताः । लक्षाधिकाः जनाः मारिताः ।

तस्मात् अहम् अत्यधिकं दुःखम् अन्वभवम् । किमर्थम् ?

यदा कश्चित् स्वतन्त्रः देशः जीयते तर्हि लक्षाधिकाः जनाः मार्यन्ते अपि च बहवः जनाःनिगडिताः भवन्ति । एतस्मिन् ब्राह्मणाः तथा च श्रमणाः अपि मार्यन्ते ।

ये जनाः स्वघनिष्ठसम्बन्धिषु मित्रेषु च प्रभूतं स्निह्यन्ति, दासेषु मृतकेषु च दयावन्तः भवन्ति । ते अपि युद्धे मार्यन्ते अथवा स्वप्रियजनेभ्यः विरहिताः भवन्ति ।

अतः अहं दुष्कृतम् अनुशोचामि । अधुना अहं धम्मं (धर्मम्) पालयितुं तथा च अन्येषां कृते अपि एतस्य शिक्षणस्य निश्चयम् अकरवम् ।

अहं मन्ये यत् धम्मस्य(धर्मस्य) माध्यमेन जनानां स्नेहपात्रत्वं बलविजयात् श्रेष्ठतरम् अस्ति । अहम् इमम् अभिलेखं भविष्यत्कालाय केनचित् सन्देशरूपेण उत्कारयन् अस्मि येन एताम् उपर्युक्ताम् घटनां दृष्ट्वा मम मृत्योः पश्चात् मम पुत्राः पौत्राः च अपि युद्धं न कुर्युः ।

एतद्विपरीतं तैः चिन्तनीयं यत् धम्मस्य वर्धनं कथं स्यात् ।

कलिङ्गयुद्धम् अभिलक्ष्य अशोकस्य मनोगत-विचारेषु कथं परिवर्तनम् अभूत् ?

('धम्मः' इति 'धर्मः' इत्यस्य संस्कृतशब्दस्य प्राकृतरूपम् अस्ति )।



इमाम् उत्कृष्ट-लेप-युक्तां पाषाणमयीं प्रतिमाम् पश्यतु । इयं प्रतिमा बिहारस्य रामपुरवायां लब्ध-मौर्यकालीन-स्तम्भस्य भागभूता अस्ति । अधुना एषा राष्ट्रपतिभवने स्थापिता अस्ति । तस्य कालस्य मूर्तिकलायाः एतत् किञ्चन उदाहरणम् अस्ति ।

### अशोकस्य कलिङ्गयुद्धम्

कलिङ्गः तटवर्तिनः उडीसाराज्यस्य प्राचीनं नाम अस्ति (पञ्चमे मानचित्रे तत् च ७६पृष्ठे वर्तते तत् पश्यतु) । अशोकः कलिङ्गं जेतुम् अयुद्ध्यत । परन्तु युद्धजनितहिंसां रक्तपातं च दृष्ट्वा तस्य युद्धात् वितृष्णा अभवत् । सः निरणयत् यत् भविष्यति काले कदापि न योत्स्यामि ।

### अशोकस्य धम्मः(धर्मः) कीदृशः आसीत् ?

अशोकस्य धम्मे(धर्मे) कस्यापि देवतायाः पूजायाः कर्मकाण्डस्य वा आवश्यकता नासीत् । सः अनुभवति स्म यत् यथा पिता स्वबालान् सुव्यवहारं शिक्षयति तथैव तस्य कर्तव्यम् आसीत् यत् स्वप्रजाः शिक्षयेत् । सः बुद्धस्य उपदेशैः अपि प्रेरितः आसीत् ।

एतादृश्यः अनेकाः समस्याः आसन् यासां कृते तस्मिन् संवेदना आसीत् । तस्य साम्राज्ये पृथक्-पृथक्-धर्मावलम्बिनः आसन् । एतस्मात् कारणात् कदाचित् परस्परं सङ्घर्षः कलहः वा जायते स्म । पशुबलिः दीयते स्म । दासैः सेवकैः

भृत्यैः च सह क्रूरतापूर्णव्यवहारः क्रियते स्म । एतद् अतिरिच्य कुटुम्बस्य प्रतिवेशिनां च मध्ये अपि कलहाः भवन्ति स्म । अशोकः अनुभूतवान् यत् एतासां समस्यानां निदानं तस्य कर्तव्यम् अस्ति। अतः सः धम्म-महामात्त-नामकाधिकारिणां नियुक्तिम् अकरोत्, ये प्रतिस्थानं गत्वा धम्म-शिक्षां(धर्मशिक्षाम्) यच्छन्ति स्म।

एतद् अतिरिच्य अशोकः स्वसन्देशान् अनेकेषु स्थानेषु शिलासु स्तम्भेषु च उत्कीर्णवान् । अशोकेन अधिकारिणः निर्दिष्टाः यत् ते नृपस्य सन्देशं तेषां जनानां मध्ये पठित्वा श्रावयेयुः, ये स्वयं पठितुं समर्थाः न आसन् । अशोकः धम्म-विचारान् प्रसारयितुं

**८४-८५पृष्ठयोः प्रदत्ते षष्ठमानचित्रे एतानि क्षेत्राणि अन्वेष्टुं प्रयतताम्**

सीरिया-मिश्र-ग्रीस-श्रीलङ्कासु च दूतान् प्रैषत् । सः अशोकः राज-मार्गान् निर्मापितवान्, कूपान् खानितवान्, विश्रामगृहाणि निर्मापितवान् । एतदतिरिच्य सः मनुष्याणां पशूनां च कृते चिकित्सा-व्यवस्थाम् अपि अकरोत् ।

### स्वप्रजायै अशोकस्य सन्देशाः

जनाः विभिन्नेषु अवसरेषु अनुष्ठानं कुर्वन्ति । उदाहरणार्थं यदा ते जनाः रुग्णाः भवन्ति यदा तेषां सन्ततीनां विवाहः भवति, शिशूनां जन्मावसरे तथा च यदा ते यात्रां प्रारभन्ते तदा ते अनेकविधानि अनुष्ठानानि कुर्वन्ति ।

एतानि कर्मकाण्डानि कार्यसाधकानि न सन्ति।

एतेषां स्थाने यदि जनाः पृथक् परम्पराः अनुपालयेयुः तर्हि ताः आधिक्येन फलदायिन्यः भविष्यन्ति । एताः विभिन्नप्रकारकाः परम्पराः काः सन्ति ?

एताः सन्ति – स्वदासैः भृत्यैः च सह सम्यग्व्यवहरणम्, ज्येष्ठानाम् आदरः, सर्वेषु जीवेषु दयाभावस्य स्थापनम्, ब्राह्मणेभ्यः श्रमणेभ्यः च दानम् ।

स्वस्य धम्मस्य (धर्मस्य) प्रशंसनम् अन्येषां च धम्मस्य (धर्मस्य) निन्दनं द्वयमेव असमीचीनम् अस्ति । प्रत्येकं जनः अपरेषां धर्मस्य आदरं कुर्यात् । यदि कश्चित् स्वस्य धर्मस्य प्रशंसाम् अपि च अन्येषां धर्मस्य निन्दां करोति तर्हि सः वास्तविकतायां स्वधर्मस्य अधिकां हानिं कुर्वन् अस्ति ।

अतः प्रत्येकं जनः अपरस्य धर्मस्य प्रमुखविश्वासान् अवगन्तुं प्रयासं कुर्वन् तम् आद्रियेत ।

भारतस्य प्रथमः प्रधानमन्त्री जवाहरलालनेहरुः अलिखत्, अद्य अपि तेषां महापुरुषाणां धर्मशिक्षाः अस्माभिः सह कयाचित् एतादृश्या भाषया वार्तालापं कुर्वन्ति याः शिक्षाः वयम् अवगन्तुं पारयामः.... येभ्यः च वयं बहुकिमपि शिक्षितुं शक्नुमः ।

अशोकः धम्मस्य विचारान् दूरं यावत् प्रसारयितुं तान् धर्मविषयान् अबोधयत् । ये भवत्याः अनुसारम् अद्य अपि प्रासङ्गिकाः सन्ति । अशोकस्य सन्देशस्य तान् भागान् ज्ञापयतु, ये अद्य अपि प्रासङ्गिकाः सन्ति ।






**अन्यत्र**

मौर्य-साम्राज्यस्य उदयात् किञ्चित् पूर्वं प्रायः २४०० वर्षेभ्यः प्राक् चीनसम्राजः चीनभित्तेः निर्माणम् आरभन्त । एतस्याः निर्माणस्य उद्देश्यम् उत्तरसीमायाः पशुपालकेभ्यः रक्षणम् आसीत् । अग्रिम-द्विसहस्र-वर्षाणि यावत् एतस्याः भित्त्याः निर्माणस्य कार्यम् अचलत् । यतो हि साम्राज्यस्य सीमाः मध्ये मध्ये परिवर्तमानाः आसन्। इयं भित्तिः प्रायः ६४००किलोमीटर-परिमित-दैर्घ्ययुक्ता अस्ति । एषा पाषाणैः इष्टिकाभिः च निर्मिता अस्ति । एतस्याः उपरितनः भागः राजमार्गवत् प्रथितः अस्ति । एतां भित्तिं निर्मातुं सहस्राधिकाः जनाः कार्यं कृतवन्तः । एतस्यां प्रत्येकं १००-२०० मीटरपरिमितेषु स्थानेषु पर्यवेक्षणाय लघूनि निरीक्षागृहाणि निर्मितानि सन्ति ।

प्रतिवेशिदेशान् प्रति अशोकस्य दृष्टिः चैनिकसम्राजां दृष्टेः कथं भिन्ना आसीत् ?

**कल्पयतु**

भवती कलिङ्गे निवसति तथा च भवत्याः पित रौ युद्धे बहूनि कष्टानि सोढवन्तौ । सद्यः एव अशोकस्य दूताः धम्मस्य(धर्मस्य) नूतनान् विचारान् स्वीकृत्य आगतवन्तः सन्ति । भवती स्वमातापित्रोः सन्देशवाहकानां च मध्ये जातवार्त्तालापस्य वर्णनं करोतु ।

**उपयोगि शब्दाः**

साम्राज्यम्
राजधानी
अधिकारी
सन्देशवाहकः
प्रान्तः
धम्मः (धर्मः) ।

**आगच्छन्तु स्मरणं कुर्मः**



1. मौर्य-साम्राज्ये विभिन्न-व्यवसायेषु संलग्नजनानां सूचीं निर्मातु ।
2. रिक्तस्थानानि पूरयतु –

क) यत्र सम्राजां प्रत्यक्षतः शासनम् आसीत् तत्र अधिकारिणः ------ गृह्णन्ति स्म ।

ख) राजकुमाराः प्रायः प्रान्तेषु ______________ रूपेण प्रेष्यन्ते स्म ।

ग) मौर्यशासकाः गमनागमनाय महत्त्वपूर्णेषु___________ नियन्त्रणस्य प्रयासं कुर्वन्ति स्म ।

घ) प्रदेशेषु निवासिजनाः मौर्याधिकारिभ्यः ___________ यच्छन्ति स्म ।

3. बोधयतु यत् निम्नलिखितानि वाक्यानि शुद्धानि अशुद्धानि वा सन्ति -

क) उज्जैनः उत्तर-पश्चिमं प्रति गमनागमनस्य मार्गे आसीत् ।

ख) आधुनिक-पाकिस्तानस्य अफगानिस्तानस्य च प्रदेशाः मौर्यसाम्राज्यस्य आभ्यन्तरे आसन् ।

ग) चन्द्रगुप्तस्य विचाराः अर्थशास्त्रे लिखिताः सन्ति ।

घ) कलिङ्गः बङ्गालस्य प्राचीनं नाम आसीत् ।

ङ) अशोकस्य अधिकतराः अभिलेखाः ब्राह्मीलिप्यां सन्ति ।

**काश्चन महत्त्वपूर्णतिथयः**

➢ मौर्यसाम्राज्यस्य आरम्भः (2300 वर्षेभ्यः पूर्वम्)

## आगच्छन्तु चर्चां कुर्मः



4 . तासां समस्यानां सूचीं निर्मातु येषां समाधानम् अशोकः धम्मद्वारा चिकीर्षति स्म ।

5. धम्मस्य (धर्मस्य) प्रचाराय अशोकः केषां साधनानां प्रयोगम् अकरोत् ?

6. भवत्याः अनुसारं दासैः सेवकैः च सह दुर्व्यवहारः किमर्थं क्रियते ? किं भवन्तः अनुभवन्ति यत् सम्राजः आदेशैः तेषां सेवकानां स्थितौ परिवर्तनं जातं स्यात् ? सकारणं स्वोत्तरं वदतु ।

## आगच्छन्तु कृत्वा पश्यामः



7. रौशनां बोधयन् कञ्चित् अनुच्छेदं लिखन्तु यत् अस्माकं मुद्रासु सिंहाः किमर्थं दृश्यन्ते ? न्यूनातिन्यूनं इतोऽपि कस्यचित् एकस्य वस्तुनः नाम गृह्णन्तु, यस्मिन् एतेषां सिंहानाम् एव चित्राणि स्युः ।

8. यदि भवतां समीपे निजाभिलेखान् प्रस्तोतुं सामर्थ्यं स्यात् तर्हि भवन्तः काः चतस्रः राजाज्ञाः दद्युः ?

## मानचित्रम् – ६

## कौशेय-मार्ग-सहिताः महत्त्वपूर्णाः व्यापारिकमार्गाः ।




- (भूरा) एते मार्गाः चैनिकशासकानां नियन्त्रणे आसन्।
- (हरित) एते मार्गाः कुषाणानां नियन्त्रणे आसन् (अध्यायः – १०)।
- (हल्का हरित) एते महत्त्वपूर्णाः समुद्रमार्गाः आसन्।
- (रक्त) एते मार्गाः ईरानशासकानां नियन्त्रणे आसन्।
- (बैंगनी) एतेषु मार्गेषु रोमनशासकानां नियन्त्रणम् आसीत्।

चीनस्य भारतस्य ईरानस्य अरबस्य यूनानस्य रोमनस्य च व्यापारिणः अस्मिन् आदान-प्रदान-कार्यक्रमे भागं गृहीतवन्तः । दक्षिणभारतस्य पत्तनानि कृष्णमरीचिकायाः अन्येषाम् उपस्कराणां च निर्यातस्य दृष्ट्या महत्त्वपूर्णानि आसन् । मानचित्रे पोडुका (दक्षिण-भारते) अन्वेषयन्तु । अरिकामेडोः इदं रोमननाम आसीत् (अध्यायः ९) ।

*दि-टाइम्स-एटलस-आफ-वर्ल्ड-हिस्ट्री(संपा.ज्योफ्रे-बारक्लो) हैमंड-इंक-न्यू-जर्सी, १९८६,पृ.७०-७१ इत्याधारितम् अस्ति ।*

## अग्रिमा वार्त्ता

प्रायः २२००वर्षेभ्यः पूर्वं मौर्यसाम्राज्यस्य पतनम् अभवत् । अस्य स्थाने (साकमेव अन्येषु स्थानेषु) अनेकेषां नूतनानां राज्यानाम् उदयः अभवत् । पश्चिमोत्तरयोः तथा च उत्तरभारतस्य केषुचित् भागेषु प्रायः शतं वर्षाणि यावत्



**हिन्द-यवन-निष्कः**

हिन्द-यवन-राज्ञां शासनम् आसीत् । तदनन्तरं पश्चिमोत्तरयोः उत्तरे पश्चिमभारते च शकनामकानां मध्यैशियानां जनानां शासनम् आरब्धम् । एतेषु कानिचन राज्यानि प्रायः ५००वर्षाणि यावत् अतिष्ठन्, यावत्पर्यन्तं शकशासकाः गुप्तशासकेभ्यः पराजयं न प्राप्तवन्तः (एकादशाध्याये चर्चा वर्तते) । शकानां पश्चात् कुषाणाः शासनं स्थापितवन्तः (प्रायः २०००वर्षेभ्यः प्राक्) । दशमे अध्याये भवन्तः कुषाणानां विषये विस्तरेण ज्ञास्यन्ति ।



**कुषाण-निष्कः**

उत्तरस्य मध्यभारतस्य च केषुचित् क्षेत्रेषु मौर्यसेनानायकः पुष्यमित्रशुंगः राज्यस्य स्थापनाम् अकरोत् । शुंगानां पश्चात् कण्वानाम् अन्येषां च केषाञ्चित् वंशानां शासनं तावत्पर्यन्तम् अचलत् यावत्पर्यन्तं प्रायः १७००वर्षेभ्यः पूर्वं गुप्तसाम्राज्यस्य स्थापना अभवत् । अस्माभिः दृष्टं यत् पश्चिमभारतस्य केषुचित् भागेषु शकानां शासनम् आसीत् । अत्र पश्चिमभारते



**शक-निष्कः**

मध्यभारते च शासनं कुर्वद्भिः सातवाहनशासकैः सह नैकानि युद्धानि अभवन् । प्रायः २१००वर्षेभ्यः पूर्वं स्थापितं सातवाहनराज्यं प्रायः ४००वर्षाणि यावत् अतिष्ठत् । प्रायः १७००वर्षेभ्यः पूर्वं मध्यभारते पश्चिमभारते च वाकाटकवंशेन शासनं स्थापितम् ।

दक्षिणभारते २२००तः १८००वर्ष-पूर्वकाले चोलाः चेराः पाण्ड्याः च शासनं कृतवन्तः । प्रायः १५००वर्षेभ्यः पूर्वं पल्लवानां चालुक्यानां च द्व्योः महतोः राज्ययोः स्थापना अभवत् ।

एतदतिरिच्य अनेके राजानः अनेकानि राज्यानि च आसन् । एतेषां विषये वयं तेषां मुद्राभिः पाण्डुलिपिभिः पुस्तकैः च जानीमः । एतेन सम्पूर्णेन घटनाक्रमेण सह एव अनेकानि परिवर्तनानि एतादृशानि अपि जायमानानि आसन् येषु सामान्यस्त्रीपुरुषाणां महत्त्वपूर्णं योगदानम् आसीत् । एतस्मिन् काले कृषेः प्रसारः नूतननगराणां विकासः उद्योगे व्यापारे च प्रगतिः आसीत् । व्यापारिणः एकतः यत्र उपमहाद्वीपस्य अन्तःभागेषु तथा च बाह्यभागेषु भूमार्गाणाम् अन्वेषणम् अकुर्वन् । तत्र एव पश्चिममैशियायाः पूर्व्यफ्रीकायाः दक्षिणपूर्वैशियायाः च समुद्रमार्गाः अपि उद्घटिताः । मन्दिराणाम् अन्येषां च स्तूपानाम् अर्थात् स्तम्भानां भवनानां च निर्माणम् अपि अभवत् । पुस्तकानि विलिखितानि सार्धम् एव वैज्ञानिकान्वेषणानि अपि अभवन् । एषा सम्पूर्णा प्रक्रिया सहैव भवति स्म । एतस्य पुस्तकस्य अन्यान् भागान् पठन्तः भवन्तः एतानि तथ्यानि मनसि धारयन्तु ।



**सातवाहन-निष्कः**

इति अष्टमोऽध्यायः